क्षुधार्त्तो भक्षयित्वासौ खड्गमड्डाणकं ददौ KumāDeC. 3.21; KumāPraPra. 45.20.

**अड्डावज** (aḍḍāvaja) *m.* name of a musical instrument (also called *deśīpaṭaha*) देशीपटहमेवाहुरिममड्डावजं जना: SaṁgīRa. iii. 395.4 (6.824)

**अड्डिडिष** (aḍḍiḍi-ṣa) I. P. [desid.] to desire to attack etc. अड्डिडिषति KātanVṛ. *on* iii. 3.3; DhātuPra. 1.350 (31.13); KāśiVṛ. *on* P. vi. 1.3.

**अड्डित** (aḍḍita) *n.* name of one of the Bhauma (earthly) *maṇḍalas* (combination of Cārīs) चारीसंयोगजानीह मण्डलानि निबोधत।··· मण्डलानि द्विजश्रेष्ठा भूमिगानि निबोधत। भ्रमरास्कन्दिते ··· अड्डितं शकटास्यं च NāṭyaSa. 11.5; मण्डलानि दशान्यानि ··· भौमानि ··· अड्डितं शकटाव्यं(? स्यं) च तथाहार्यमिति स्मृतम् ViṣṇuDhaP. iii. 20.27; चारीचयविशेष: प्राङ्मण्डलं प्रतिपादितम्। तद्भेदानधुना धीमान् वक्ति श्रीकरणाग्रणी:। भ्रमरास्कन्दितावर्तशकटास्यानि चाड्डितम् SaṁgīRa. iv. 348.1 (7.1143); वाममड्डितमन्यत्तु कुर्यादध्यर्द्धिकं तत:। वामं तु भ्रमरं चान्यत् स्यन्दितं तेन भूतलम्। यस्मिन्नास्फालयेदेतत् परिकीर्तितमड्डितम् NṛttaRa. 3.154; उद्घट्टितोऽथ बद्ध: स्यात् समोत्सरितपूर्वक:।··· दक्षिणो यदि पाद: स्यादड्डितं मण्डलं तदा Nṛtyā. 1569; उद्घाटितस्ततो बद्ध: समोत्सारितपूर्वक:। मत्तल्लिरर्धमत्तल्लिरपक्रान्ताभिधस्तत:। उद्वृत्तो विद्युद्भ्रान्तश्च भ्रमर: स्पन्दितस्तथा। दक्षिणो वामपादस्तु शकटास्य: पर: पुन:। द्वि: स्याच्चाषगतिर्वामोऽड्डितोऽध्यर्धिकतां गत:। तथा चाषगतिर्दक्ष: समोत्सरितमत्तल्लि:। मत्तल्लिर्भ्रमरश्चैव वामोऽथो दक्षिण: पुन:। स्पन्दितां चारिकां कृत्वा भूतटास्फोटनं यदा। कुरुते प्राहुराचार्यास्तदा मण्डलमड्डितम् NṛtyaK. ii. 4.22; *m.* name of one of the ways of playing the musical drum (Mṛdaṅga) अड्डितालिप्तमार्गौ तु वितस्ता गोमुखी तथा। मार्गाश्चत्वार:···प्रहारकरणाश्रया: NāṭyaSa. 34.48; *adj.* (the foot-posture) in the *aḍḍitā cārī* आद्यो भ्रमरक: कार्यो वामश्चैवाड्डितो भवेत् NāṭyaSa. 11.47; वामोऽड्डितोऽध्यर्धिकश्च क्रमाच्चाषगति: पर: Nṛtyā. 1568; द्वि: स्याच्चाषगतिर्वामोऽड्डितोऽध्यर्धिकतां गत: NṛtyaK. ii. 4.21.

**अड्डित** (aḍḍ-ita) *adj.* attacked अन्योऽन्यमपि यावदड्डितौ द्वौ तावद् भर्तृरन्तरा प्रविश्य मेल: कृत: PrabaK. 106.25; 108.24.

**अड्डितमण्डल** (aḍḍita-maṇḍala) *n.* name of a particular Maṇḍala (a group of *cārīs*) in dance सव्यमुद्घट्टितं कृत्वा तेनैवावर्तमाचरेत्। तेनैवास्कन्दित: कार्य: शकटास्यश्च वामक:। आद्य: पृष्ठापसर्पी च स च चाषगतिर्भवेत्। अड्डितश्च पुनर्वाम आद्यश्चैवापसर्पित:। वामो भ्रमरक: कार्य: आद्य आस्कन्दितो भवेत्। तेनैवास्फोटनं कुर्यादेतदड्डितमण्डलम् NāṭyaSa. 11.61.

**अड्डितमार्ग** (aḍḍita-mārga) *m.* **i** a manner of playing the drum (Mṛdaṅga) तत्र किङ्क(त्राङ्किक)मृदङ्गप्रहारयुक्तोऽड्डितमार्ग: ··· तत्राड्डित(ता)प्रहारजातम्। मटकटथिधधटघेधोधहमंधि धंधनधिधि इत्यड्डितामार्ग: NāṭyaSa. 34.49; **ii** a particular type of Dhruvā song अड्डिता ध्रुवा (ध्रुवाध्यायोक्ता) शृङ्गारविषयका तत्रोचितेति कृत्वा अड्डितमार्ग: Bharatakośa 9B.34.

**अड्डिता** (aḍḍitā) *f.* **i** name of a kind of Cārī (i. e. when one foot is at rest and the other foot rubs against its fore-part and hind-part rests on the fore-foot and this is repeated with the legs inter-changed) अग्रत: पृष्ठतो वापि पादोऽग्रतलसंचर:। द्वितीयपादनिर्घृष्टो यस्यां स्यादड्डिता तु सा NāṭyaSa. 10.23; 10.9; अड्डिता चात्रादौ चारी AbhinBhā. i. 119.12 (*on* 4.114); भौमी चाकाशिकीत्येषा द्वेधा भौम्योऽत्र षोडश। समपादा स्थितावर्ता ··· अड्डिता SaṁgīRa. iv. 279.4 (7.903); समस्थितस्य पादस्य द्वितीयस्तलसंचर:। अग्रे पृष्ठे च सुश्लिष्ट: क्रमात् सा चाड्डिता मता NṛttaRa. 3.33; समाङ्घ्रे: पुरत: साक्षादन्योऽग्रतलसञ्चर:। निघृष्टोऽङ्घ्रि: क्रमाद् यत्र सा धीरैरड्डिता मता Nṛtyā. 991; अग्रेण चाथ पृष्ठेन यत्राग्रतलसञ्चरम्। ताडयेच्चरणं पाद: सम: सोक्ताड्डिताभिधा NṛtyaK. ii. 2.32; **ii** name of a type of Dhruvā song चतुर्भि: संनिपातैश्च चतुरश्रा प्रमाणत:। आद्यमन्त्यं चतुर्थं च पञ्चमं च तथा गुरु। यस्यां ह्रस्वानि शेषाणि सा ज्ञेया त्वड्डिता बुधै: NāṭyaSa. 5.123; 5.121; 5.187; 5.190; 5.214; 32.11; 32.329; अड्डिता जातिरिति AbhinBhā. i. 239.18 (*on* 5.116); सापेक्षभावरूपं संविद्विकाससुन्दरं रसमाश्रयत्यड्डिता AbhinBhā. iv. 365.25 (*on* 32.329)

**अड्डिताप्रहार** (aḍḍitā-prahāra) *m.* a manner of playing the drum producing particular sounds तत्राड्डित(ता)प्रहारजातम्। मटकटथिधधटघेधोधहमंधि धंधनधिधि इत्यड्डितामार्ग: NāṭyaSa. 34.50.

**अड्डितामार्ग** (aḍḍitā-mārga) *m.* a method of playing the drum producing certain particular sounds तत्राड्डित(ता)प्रहारजातम्। मटकटथिधधटघेधोधहमंधि धंधनधिधि इत्यड्डितामार्ग: NāṭyaSa. 34.50.

**अड्डितावाद्य** (aḍḍitā-vādya) *n.* playing the drum in *aḍḍitā* manner producing particular sounds दाधददथिमटां धीमटां दिथिथिक्कुं थिक्काथितांक्काथिकटाम्। कटधिमटां खोखोघेटामड्डितावाद्यम् NāṭyaSa. 34.55.

**अड्यालय** (aḍyālaya) *m.* name of holy place इत्थमड्डालये (v. l. अडयालये) वासो लोहाणे च भविष्यति SkandP. i(2). 65.113.

**अड्व्यवधान** (aḍ-vyavadhāna) *n.* intervention by the augment *aṭ* सेवासितेत्यत्र सितशब्दात् प्राग्ये सुनोत्यादयस्तेषामड्व्यवधानेऽपि षत्वं स्यात्। न्यषेधत् PrakriKau. ii. 58.2.

**अड्व्यवाय** (aḍ-vyavāya) *m.* **A** intervention by the augment *aṭ* प्राक् सितादड्व्यवायेऽपि P. viii. 3.63; viii. 3.71; viii. 3.119; स्तुस्वञ्जसिवादीनां वाड्व्यवाये CāndraVyā. vi. 4.56; अड्व्यवायेऽभ्यासव्यवाये सुट् कात् पूर्वो भवति KāśiVṛ. *on* P. vi. 1.136; परिनिविभ्य: परेषां सिवसहसुट्स्तुस्वञ्जामड्व्यवायेऽपि वा षत्वं स्यात्। झलो झलि। न्यस्वङ्क। न्यष्वङ्क PrakriKau. ii. 137.4; ii. 263.9; सितशब्दात् प्राग् ये सुनोत्यादयस्तेषामड्व्यवायेऽपि षत्वं स्यात् SiddhāKau. 354B.6; **B** intervention by the vowels or semi-vowels (except *l*) or *h* (included in the Pratyāhāra *aṭ*) अड्व्यवाये तावत्। करणम् ···गिरिणा KāśiVṛ. *on* P. viii. 4.2; अत्राड्व्यवायेऽपि णत्वं स्यादिति Prasā. i. 14.12.

**अढ** (a-ḍha) *adj.* **1** (verb) without an object (*ḍha*) (i. e. intransitive) देशाध्वकालभावं वाढै: MugdhaBo. 5.3 (45.15); 5.5 (46.1); 19.13 (128.7); **2** other than the object ढवङ् ढघोऽढे MugdhaBo. 24.8 (142.15); 26.87 (159.12); **3** other than the (*taddhita*) suffix *ḍha* तत्र ह्यढ इति किमित्युक्त्वा श्यैनेयो रौहिणेय इति प्रत्युदाहृतम् PariVṛ.(Sī.) 132.22; भस्याढे तद्धिते। पुंवद्भाव:। हस्तिनीनां समूहो हास्तिनम् PrakriKau. i. 586.4; LaSabdeSe. ii. 98.1; ii. 232.11.

**अढवीज** (aḍhavīja) *m.* name of a merchant caste येऽभूवन्गोभुजा: पुरा। तेषां मध्यात्तु संजाता अढवीजा वणिग्जना: SkandP. iii(2). 38.48.

**अढूजी** (aḍhūjī) *m.* name of a Jain merchant श्रीगंधारवास्तव्यप्रागवंशज्ञातीय। संघवी श्रीजावडा सुत सं. श्री[सीपा]भार्या बाई॥ गिर [सुनाम्ना सुत। सं] जिवंत भातृ। सं। काउजी। सं। अ[ढू]जी प्रमुख[स्व]कुटं(? टुं)बेन युत: EI. ii. 49.5.

[1]**अण्** (aṇ-) I. P. [अण ··· शब्दार्था: DhātuPā. 1.471; अण रण इति शब्दार्थ: Nyās. ii. 322.10 (*on* vi. 1.203); अणेरणति शब्दार्थे DaivaVyā. 92; DhātuPra. 1.444 (37.6); SiddhāKau. 367A.1; अणति KośaKaTa. 2.2095; used for etymology only] to sound, to speak अणश्च Uṇā. 1.8 = SaraKaṇṭhā.(Gr.) ii. 1.8; यस्मात्पुरा ह्यणंतीदं पुराणं तेन चोच्यते BrahmāṇḍP. iii. 4.54; धात्वादेरित्येव। अणति KāśiVṛ. *on* vi. 1.65; अणु:···अणति नदति ParāTri. 256.5; अथवा - अण रणेति धातोरण: शब्द: PrabhāC. 57.26; अपि तु ब्रह्म वेदानणति शब्दायते व्याहरतीति यावत्। स ब्रह्माण: LalitāSaBh. 14.21 (*on* 34); शुभात्मिका वाणी कल्या तामेवाणति शब्दायतेऽसौ कल्याणी LalitāSaBh. 90.16 (*on* 124)

[2]**अण्** (aṇ-) IV. A. [cerebralisation of *an-*; MAYR. 1. p. 26 / अण ··· प्राणने DhātuPā. 4.66; प्राणने त्वण्यते श्यनि DaivaVyā. 92; cf. *an-*, अन इति दन्त्यान्त्योऽयमित्येके SiddhāKau. 404A.10; SiddhāKau. gives the forms अण्यते, आणे, अणिता] to breathe अणु: - अण्यते प्राणिति ParāTri. 256.5.

[3]**अण्** (aṇ-) II. P. [cerebralisation of *an-*] to breathe प्रकर्षेण अणिति स्थितिं लभते तस्मिन् कृत्स्नं जगदिति प्राण: BrahmSūBh.(Bhā.) 31.25 (*on* i. 1.23)

[4]**अण्** (aṇ) (Gr.) **1** a technical term (Pratyāhāra) of Grammar standing for the vowels *a*, *i* and *u* (based on SivSū.(Gr.) 1 and formed according to P. i. 1.71) उरण् रपर: P. i. 1.51; ऋकोऽणो रलौ CāndraVyā. i. 1.15 = SaraKaṇṭhā.(Gr.) i. 2.37; ढ्रलोपे पूर्वस्य दीर्घोऽण: P. vi. 3.111; JaineVyā. iv. 3.216; ढ्रलोपेऽण: CāndraVyā. v. 2.137; ढ्रलुच्यण: SākaṭāVyā. i. 1.80; अचश्चेत्येवं सिद्धयोर्ह्रस्वदीर्घयोर्यदण्ग्रहणं करोति तस्यैतत्प्रयोजनमनचोऽप्यणे दीर्घह्रस्वौ यथा स्याताम् PariVṛ.(Sī.) 2.7; PrakriKau. i. 900.4; केऽण: P. vii. 4.13; CāndraVyā. vi. 2.70; के परेऽणो ह्रस्व: स्यात् PrakriKau. i. 935.4; ii. 408.4; अणोऽप्रगृह्यस्यानुनासिक: P. viii. 4.57; अणोऽनुनासिक: CāndraVyā. vi. 4.150; विरामेऽगिदनाङ्चाद्यण् वानुनासिक: SākaṭāVyā. i. 1.68; शासेरिदुपधाया अणव्यञ्जनयो: Kātan. iii. 4.48; मोऽणोऽम: SākaṭāVyā i. 2.36; आण्जश्रज्झष: SākaṭāVyā. iv. 1.77; AgniP. 348.3; **2** a technical term (Pratyāhāra) of Grammar standing for all the vowels, semi-vowels and *h* (based on SivSū.(Gr.) 1–6 and formed according to P. i. 1.71) अणुदित्सवर्णस्य चाप्रत्यय: P. i. 1.69; अणुदित् स्वस्यात्मनाभाव्योऽतपर: JaineVyā. i. 1.72; अविधीयमानोऽण् ससवर्ण: SaraKaṇṭhā.(Gr.) i. 2.4; PariVṛ.(Sī.) 23.4; PrakriKau. i. 24.4; अणमुद्दिश्य सवर्णबोधकतात्र विधीयते LaSabdeSe. i. 38.4.

[5]**अण्** (aṇ) (Gr.) *kṛt* suffix *a* causing *vṛddhi* (P. vii. 2.115), with accent on the initial syllable of the first member of the compound in certain cases (P. vi. 2.75–78) and feminine suffix *ī* (*ṅīp*) (P. iv. 1.15) expressing: **A** agent (when the first member of the compound expresses the